[1]च्यवः, [2]च्यवनः, च्यावः, चुच्यूषुः, [3]चोच्युवः, चुच्यावयिषुः-चिच्यावयिषुः ;

च्योतव्यम्, च्यावयितव्यम्, चुच्यूषितव्यम्, चोच्यूयितव्यम्, चुच्यावयिषितव्यम्-चिच्यावयिषितव्यम् ;

च्यवनीयम्, च्यावनीयम्, चुच्यूषणीयम्, चोच्यूयनीयम्, चुच्यावयिषणीयम्-चिच्यावयिषणीयम् ;

[4]च्यव्यम्-[5]अवश्यच्याव्यम्, च्याव्यम्, चुच्यूष्यम्, चोच्यूय्यम्, चुच्यावयिष्यम्-चिच्यावयिष्यम् ;

ईषच्च्यवः-दुश्च्यव-सुच्यवः ; — — —

[6]च्यूयमानः, च्याव्यमानः, चुच्यूष्यमाणः, चोच्यूय्यमानः, चुच्यावयिष्यमाणः-चिच्यावयिष्यमाणः ;

[7]च्यवः, च्यावः, चुच्यूषः, चोच्यूयः, चुच्यावयिषः-चिच्यावयिषः ;

च्योतुम्, च्यावयितुम्, चुच्यूषितुम्, चोच्यूयितुम्, चुच्यावयिषितुम्-चिच्यावयिषितुम् ;

च्युतिः, च्यावना, चुच्यूषा, चोच्यूया, चुच्यावयिषा-चिच्यावयिषा ;

[A]च्यवनम्, च्यावनम्, चुच्यूषणम्, चोच्यूयनम्, चुच्यावयिषणम्-चिच्यावयिषणम् ;

च्युत्वा, च्यावयित्वा, चुच्यूषित्वा, चोच्यूयित्वा, चुच्यावयिषित्वा-चिच्यावयिषित्वा ;

---

1. पचादित्वेन (3-1-134) अचि, गुणावादेशौ।
2. चलनार्थकत्वेन, 'चलनशब्दार्थादकर्मकात्—' (3-2-148) इति ताच्छीलिको युच्। अनादेशः।
3. यङन्तात् पचाद्यचि (3-1-134) 'यङोऽचि च' (2-4-74) इति, अचो लुकि, 'न धातुलोप—' (1-1-4) इति गुणनिषेधे, उवङ्।
4. 'अचो यत्' (3-1-97) इति यति, गुणावादेशौ।
5. 'ओरावश्यके' (3-1-125) इति ण्यत्।
6. 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः।
7. 'ऋदोरप्' (3-3-57) इति भावे घञपवादोऽप्प्रत्ययः।

A. 'अत्तुं महेन्द्रियं भागमैति दुश्च्यवनोऽधुना ॥' भ. का. 5-11.